# 2021

## SANSKRIT — HONOURS

### Paper : SEC-B-2

### (Spoken and Computational Sanskrit)

### Full Marks : 80

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**1.** (a) यथेच्छम् ***अनुच्छेदद्वयं*** संस्कृतभाषायाम् अनूद्य देवनागरीलिप्या लिखत। 10×2

(i) Long ago there lived a flock of pigeons in a dense forest. In the flock, there was an old pigeon, which was very wise. All the pigeons respected and loved the wise pigeon. During the daytime, the pigeons used to fly all over the jungle in search of food and water. Every day, before the nightfall, they used to come to their nest.

(ii) In ancient India, there lived a young hunter prince by the name of Ekalavya. He aspired to become a great warrior. He approached guru Droṇācārya — the teacher of Pāṇḍavas and Kauravas — and requested that he be taken as the Guru's disciple. Being a Śūdra, he was refused, mocked and sent away.

(iii) Once upon a time Bodhisattva was born in a Brahmin family in the province of Kośala. He had three daughters. He passed away before their marriage. He became a golden swan in the next birth. He lived in a lake in some region of Himālaya.

(b) अधोलिखितेषु ***द्वयोः*** अनुच्छेदयोः आङ्गलभाषायां मातृभाषायां वा अनुवादो विधेयः। 10×2

(i) कस्मिंश्चित् ग्रामे मित्रशर्मा नाम ब्राह्मणः आसीत्। सः अतीव निर्धनः। कदाचित् स ग्रामान्तरं गतवान्। तत्रत्यः भूस्वामी अतीव दयालुः आसीत्। स ब्राह्मणाय दानरूपेण एकम् उत्तमम् अजं दत्तवान्। ब्राह्मणः तम् अजं स्वग्रामम् आनेतुम् उद्युक्तः। परन्तु अजः मार्गे इतस्ततः धावितुम् आरब्धवान्। अतः ब्राह्मणः तम् अजं स्कन्धे निधाय ग्रामाभिमुखं प्रस्थितः।

(ii) भारद्वाजः वृद्धः जातः। एकदा ब्रह्मा तस्य समीपम् आगतवान्। उक्तवान् च – महर्षे, भवान् इदानीं शतायुः अस्ति। इदानीं भवतः आयुः समाप्तम्। तथापि भवान् लोकोपकारी। अतः भवतः विषये अहं तुष्टः अस्मि। अहम् इदानीं भवते वरम् एकं ददामि। तेन वरेण भवान् पुनः युवकः भविष्यति। पुनः शतवर्षपर्यन्तं जीवतु इति।

(iii) अस्ति तुङ्गभद्रायाः तीरे कश्चन ग्रामः। तत्र मायणः नाम कश्चित् गृहस्थः निवसति स्म। मायणस्य त्रयः पुत्राः - माधवः सायणः भोगनाथः च इति। त्रयः अपि तेजस्विनः। ग्रामस्य समीपे कश्चन आश्रमः आसीत्। ते तत्र विद्याभ्यासं कुर्वन्ति स्म। माधवः अभ्यासे क्रीडादिषु च अग्रगण्यः, गुरूणां च प्रियतमः।

**2.** प्रदत्तं सन्दर्भं पठित्वा तदनुसारम् अधःप्रदत्तानां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेया। 2×5

पुरा हिमाचलप्रदेशस्य कस्मिंश्चित् ग्रामे एकः रामनाम्ना दरिद्रः विप्रः अवसत्। सः अतीव कष्टेन जीवनम् यापयति स्म। एकदा तस्मिन् ग्रामे एकः साधुः आगतवान्। सायंकाले स स्वकुटीराद् बहिः प्रवचनमकरोत्। प्रवचनकाले स ग्रामात् विंशतिक्रोशदूरस्थितैकस्य देवालयस्य वर्णनमकरोत् अवदत् च तत्रत्या देवता अतीव जाग्रता, तत्र चैकः सिद्धपुरुषोऽपि अस्ति। स सर्वेषाम् अभिलाषान् पूरयति। स दरिद्रः ब्राह्मणः स्वमनसि निश्चयमकरोत् यत् स देवालये ईश्वरस्य दर्शनम् कृत्वा स्वदुःखानि कथयिष्यति इति। तस्य कामना अवश्यमेव पूर्णा भविष्यति इति च तस्य विश्वासः।

एवं चिन्तयित्वा रामः अन्येद्युः विंशतिक्रोशान् पादाभ्यां चलित्वा देवालयं प्राप्तवान्। तत्र स जनानां समूहं दृष्ट्वा अचिन्तयत्-अहम् एकाकी एव ईश्वरस्य दर्शनम् करिष्यामि तदैव स्वमनसः इच्छाम् अपि कथयिष्यामि इति। स प्रतीक्षाम् अकरोत्। यदा देवालये जनानाम् गमनमागमनं समाप्तम् अभवत् तदा तत्र अतितिमिरः अभवत्। देवालयस्य द्वारात् दीपकस्य प्रकाश एव बहिरागच्छति स्म। रामः यदा द्वारे प्रवेष्टुम् ऐच्छत् तदैव एकः दिव्यः पुरुषः तस्य मार्गम् अवरुद्धवान् अपृच्छत् च– "कुत्र गच्छसि राम"! "ईश्वरस्य दर्शनाय"– रामः प्रत्यवदत्। "ईश्वराय दातुम् किञ्चित् आनीतवान्"? इति दिव्यनरः अपृच्छत्। भवान् एव वदतु यत् ईश्वराय किम् यच्छानि? "संसारस्य मूल्यवत् वस्तु अर्पय, तेनैव त्वम् ईश्वरस्य दर्शनं कर्तुं शक्नोषि।" इति दिव्यपुरुषः अकथयत्। रामः चिन्तितवान् संसारस्य मूल्यवत् वस्तु किं भवितुं शक्नोति। सः अचिन्तयत् यत् सम्राजः रत्नजडितमुकुटात् मुल्यवद् वस्तु संसारे किञ्चिदपि न भवितुं शक्नोति। येन केनापि उपायेन स मुकुटमचोरयत् तं नीत्वा देवालयमागच्छत्।

दिव्यपुरुषः पुनः तस्य मार्गम् अवरुद्धावान्। "किम् ईश्वराय उपहारम् आनीतवान्"। –सोऽवदत्। "आम्, अहं नृपस्य बहुमूल्यमुकुटम् ईश्वराय दास्यामि" – रामः प्रत्यवदत्।

"राम! त्वम् मूढः असि। प्रभुः त्रयाणां लोकानां स्वामी अस्ति, तस्य कृते अयम् उपहारः तुच्छः अस्ति। त्वम् ईश्वरस्य दर्शनं कर्तुम् असमर्थः असि" – इति सिद्धपुरुषः अवदत्।

प्रश्नाः–

(a) प्रवचनकाले साधुः किम् अवदत्?

(b) दरिद्रो ब्राह्मणः किं निश्चयमकरोत्?

(c) रामः किमर्थं प्रतीक्षामकरोत्?

(d) रामः ईश्वराय उपायनरूपेण दातुं किं नीत्वा देवालयमगच्छत्?

(e) रामः किमर्थम् ईश्वरं द्रष्टुमसमर्थः?

**3.** अधोलिखितयोः कस्य***चिदेकस्य*** उत्तरं यथानिर्देशं देयम्। 10

(a) युष्माकं लोकालये कोभिड् १९ इति रोगस्य प्रकोपं तत्प्रतिविधानानुरोधं च विज्ञाप्य स्वास्थ्यविभागस्य आधिकारिकं प्रति पत्रमेकं संस्कृतभाषया देवनागरीलिप्या च लिख्यताम्।

(b) महाविद्यालये अनुपस्थितेः कारणमुल्लिख्य तन्मार्जनार्थम् अध्यक्षं प्रति संस्कृतभाषया देवनागरीलिप्या च पत्रमेकं लिख्यताम्।

(c) ग्रामस्थं पितरं प्रति नगरे अध्ययनरतस्य पुत्रस्य परीक्षाफलं सूचयित्वा पत्रम् एकं संस्कृतभाषया देवनागरीलिप्या च लिख्यताम्।

**4.** अधोलिखितेषु ***विषयमेकम***वलम्ब्य न्यूनतया पञ्चाशदधिकशतशब्दैः संस्कृतभाषया देवनागरीलिप्या च प्रबन्धः लिख्यताम्। 20×1

(a) कस्यचिन्महापुरुषस्य जीवनचरितम्।

(b) वन्यप्राणिसंरक्षणम्।

(c) नारीसुरक्षा तासां सबलीकरणञ्च।

———————